# Radha Stotram by Vyasa

# राधास्तोत्रम्

## Document Information

Text title : Radhastotram by Vyasa

File name : rAdhAstotramvyAsa.itx

Category : devii, radha, devI

Location : doc_devii

Author : Vyasadeva

Description/comments : Brahmandapurana

Latest update : September 19, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2020

*sanskritdocuments.org*

Radha Stotram by Vyasa

# राधास्तोत्रम्

गृहे राधा वने राधा राधा पृष्ठे पुरः स्थिता ।
यत्र यत्र स्थिता राधा राधैवाराध्यते मया ॥ १॥

जिह्वा राधा श्रुतौ राधा राधा नेत्रे हृदि स्थिता ।
सर्वाङ्गव्यापिनी राधा राधैवाराध्यते मया ॥ २॥

पूजा राधा जपो राधा राधिका चाभिवन्दने ।
स्मृतौ राधा शिरो राधा राधैवाराध्यते मया ॥ ३॥

गाने राधा गुणे राधा राधिका भोजने गतौ ।
रत्रौ राधा दिवा राधा राधैवाराध्यते मया ॥ ४॥

माधुर्ये मधुरा राधा महत्त्वे राधिका गुरुः ।
सौन्दर्ये सुन्दरी राधा राधैवाराध्यते मया ॥ ५॥

राधा रससुधासिन्धु राधा सौभाग्यमञ्जरी ।
राधा व्रजाङ्गनामुख्या राधैवाराध्यते मया ॥ ६॥

राधा पद्मानना पद्मा पद्मोद्भवसुपूजिता ।
पद्मे विवेचिता राधा राधैवाराध्यते मया ॥ ७॥

राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम् ।
वृन्दावनेश्वरी राधा राधैवाराध्यते मया ॥ ८॥

जिह्वाग्रे राधिकानाम नेत्राग्रे राधिकातनुः ।
कर्णे च राधिकाकीर्तिर्मानसे राधिका सदा ॥ ९॥

कृष्णेन पठितं स्तोत्रं राधिकाप्रीतये परम् ।
यः पठेत् प्रयतो नित्यं राधाकृष्णान्तिगो भवेत् ॥ १०॥

आराधितमनाः कृष्णो राधाराधितमानसः ।
कृष्णाकृष्टमना राधा राधाकृष्णेति यः पठेत् ॥ ११॥

इति ब्रह्माण्डापुराणान्तर्गतं व्यासदेवविरचितं राधास्तोत्रं सम्पूर्णम् ।

*Radha Stotram by Vyasa*

pdf was typeset on September 19, 2020

Please send corrections to *sanskrit@cheerful.com*